# Sagareshvaralingashivakshetre Bhillena Vanasamrakshana Varnanam

# સાગરેશ્વરલિઙ્ગશિવક્ષેત્રે ભિલ્લેન વનસંરક્ષણવર્ણનમ્

## Document Information

Text title : Sagareshvaralingashivakshetre Bhillena Vanasamrakshana Varnanam

File name : sAgareshvaralingashivakShetrebhillenavanasaMrakShaNavarNanam.itx

Category : shiva, shivarahasya, raksha

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 31|| -

Latest update : June 18, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

Sagareshvaralingashivakshetre Bhillena Vanasamrakshana Varnanam

# સાગરેશ્વરલિઙ્ગશિવક્ષેત્રે ભિલ્લેન વનસંરક્ષણવર્ણનમ્

(શિવગૌરીસંવાદે)

ઈશ્વરઃ -

અત્રેતિહાસં વક્ષ્યામિ સાવધાનમનાઃ શ્રૃણુ ।
તત્ર બિલ્વવને કશ્ચિદાસીદ્ ભિલ્લો ધનુર્ધરઃ ॥ ૩૬॥

સ બિલ્વભૂરુહાણાં ચ પાલકોઽભૂચ્છુચિસ્મિતે ।
તસ્યાપારૈઃ પુણ્યબલૈર્ભિલ્લસ્યાપ્યભવન્મતિઃ ॥ ૩૭॥

વનદન્તિભયાર્થં ચ તેન કણ્ટકપઙ્ક્તિભિઃ ।
વનસ્યાવરણં ચક્રે પ્રબલૈઃ કાષ્ઠસંચયૈઃ ॥ ૩૮॥

વરાહમહિષાણાં ચ ગજશુણ્ડારદૈસ્તદા ।
વૃક્ષમૂલાનિ ભજ્યન્તે મૃગાણાં ચ ભયાત્ તદા ॥ ૩૯॥

મત્તાઃ કરટિનો ઘોરાઃ સ્વશુણ્ડાવલયૈર્ધૃતામ્ ।
નવારુણાં બિલ્વશાખાં ભઙ્ક્ત્વા ભુક્ત્વા પ્રયાન્તિ ચ ॥ ૪૦॥

સ પ્રાતર્બિલ્વશાખાં તાં દૃષ્ટ્વા હસ્તિવિમર્દિતામ્ ।
દુઃખિતઃ સ તદા ગૌરિ તસ્મિન્નેવાકરોદ્વને ॥ ૪૧॥

સ્વકુટીં પર્ણકૈઃ શાખિશાખાવ્રજમનોહરામ્ ।
પુત્રૈશ્ચ બાલકૈઃ સાર્ધં પત્ન્યા તત્રાવસચ્છિવે ॥ ૪૨॥

કુદ્દાલપિટકોદ્દામહસ્તો નિત્યં ધનુર્ધરઃ ।
હસ્તિયૂથાંશ્ચ મહિષાન્ વરાહાંસ્તાડયત્યપિ ॥ ૪૩॥

સ શરૈસ્તીક્ષ્ણભાલૈશ્ચ દન્તિકુમ્ભેષુ શાઙ્કરિ ।
શ્રૃઙ્ગાન્તરેષુ મહિષાન્ દંષ્ટ્રાસન્ધિષુ સૂકરાન્ ॥ ૪૪॥

તદ્ભયાન્નોપસર્પન્તિ તદ્બિલ્વવનમઞ્જસા ।

કન્દમૂલફલૈરેવ જીવન્ સ કણયાચકઃ ॥ ૪૫॥

સકુટુમ્બસ્તદા તસ્થૌ તસ્મિન્ બિલ્વૌઘકાનને ।
સૂક્ષ્મમાર્ગઃ કૃતસ્તેન ગમનાગમને તદા ॥ ૪૬॥

તમામન્ત્ર્યૈવ મુનયો ગૃહ્ણન્તિ ન્વપલ્લવાન્ ।
બિલ્વમૂલેષુ લિઙ્ગાનિ સ્થાપયિત્વાર્ચયન્તિ ચ ॥ ૪૭॥

કોમલૈર્બિલ્વપત્રૈશ્ચ ત્રિકાલં ભુવનેશ્વરિ ।
ત્રિયમ્બકમહામન્ત્રૈઃ શૈવાઃ સમ્પૂજયયન્ત્યુમે ॥ ૪૮॥

તાન્ દૃષ્ટ્વા સતતં ભિલ્લસ્તુષ્ટિમાપ્નોતિ નિત્યશઃ ।
તે ભિલ્લં પૂજયન્ત્યેવ વાગ્ભિશ્ચ કણદાનતઃ ॥ ૪૯॥

સ ભિલ્લઃ શૈવસઙ્ગત્યા બિલ્વાનાં પાલનેન ચ ।
મમ પ્રિયતરો નિત્યમભૂચ્ચ ગિરિકન્યેકે ॥ ૫૦॥

બિલ્વમૂલાનિ સર્વાણિ કુદ્દાલૈર્બાલકૈઃ સહ ।
ખાત્વા તન્મૂલદેશેષુ કૃમિદષ્ટાંશ્ચ પલ્લવાન્ ॥ ૫૧॥

ધર્મકાલેષુ તત્પત્ની જલમાદાય ભૂરિશઃ ।
ઘટૈસ્તદા મહાદેવિ કરોતિ વનપાલનમ્ ॥ ૫૨॥

કરોતિ જલદાનં સા બાલબિલવપ્રરોહણે ।
કૃમિદષ્ટાનિ પત્રાણિ લૂતાતન્તુવૃત્તાન્યપિ ॥ ૫૩॥

છિત્વા છિત્વા પાતયતિ બિલ્વભૂરુહપાલિકા ।
તન્મૂલેષુ મહાશૈવાઃ શિવમન્ત્રજપોત્સુકાઃ ॥ ૫૪॥

વસન્તિ નિયતાહારાઃ શિવલિઙ્ગાર્ચકાઃ શિવે ।
બિલ્વપત્રૈશ્ચ કુસુમૈઃ રુદ્રાધ્યાયભિષેચનૈઃ ॥ ૫૫॥

પૂજયન્ત્યેવ ગૌરીશં તન્મૂલેષુ મહેશ્વરિ ।
રુદ્રાધ્યાયજલૈઃ શીતૈસ્તન્મૂલં શીતયન્તિ તે ॥ ૫૬॥

સાયં તે દીપયન્ત્યેવ શિવલિઙ્ગં નિરીક્ષિતુમ્ ।
શિવલિઙ્ગાનિ તુઙ્ગાનિ બિલ્વયુક્તાનિ શઙ્કરિ ॥ ૫૭॥

દ્રષ્ટુમભ્યુદ્યતાઃ સર્વે દીપદીપ્તિવિરાજિતમ્ ।
તત્ર બ્રહ્માદયો દેવા નારદાદ્યા મહર્ષયઃ ॥ ૫૮॥

દ્રષ્ટું ગચ્છન્તિ નિયતાઃ બિલ્વમૂલે શિવાર્ચનમ્ ।
શિવલિઙ્ગેષુ તુઙ્ગેષુ મહાશૈવકૃતં તદા ॥ ૫૯॥

સ્તુવન્તિ નૃત્યન્તિ હસન્તિ દૃષ્ટ્વા ભુઞ્જન્તિ પશ્યન્તિ મહેશલિઙ્ગમ્ ।
જિઘ્રન્તિ નૈવેદ્યમપારપુણ્યદં શિવાઙ્ઘ્રિપુષ્પાણિ સુરા મુનીશ્વરાઃ ॥ ૬૦॥

દૃષ્ટ્વા ત્રિપુણ્ડ્રોજ્જ્વલમસ્તકાનિ સુગન્ધલિપ્તાનિ મનોહરાણિ ।
સુબિલ્વમૂલેષુ ચ સંસ્થિતાનિ સમ્પૂજ્ય જન્માનિ કૃતાર્થયન્તિ ॥ ૬૧॥

તાન્ દૃષ્ટ્વા પ્રમથાધિનાથ ગણપાન્ બ્રહ્માદિકાસ્તે સુરાઃ
 ધન્યા માન્યાક્ષિભૃઙ્ગા । । । સુતરાં પુણ્યપુઞ્જે નિમગ્નાઃ ।
દૃષ્ટ્વા લિઙ્ગાનુમેશપ્રિયવરજનિતાપારપાપૈર્વિહીનાઃ
 પ્રાપ્તાઃ પ્રાણાત્યયેઽપિ પ્રિયમમરવરૈઃ ભિલ્લમૂલેષુ સંસ્થાઃ ॥ ૬૨॥

સૂતઃ -
ઇત્યેવં સ્તુતિભિઃ સ્તુવન્તિ સતતં તદ્બિલ્વમૂલાર્ચકાન્
લિઙ્ગે તુઙ્ગે મહેશં જનિમૃતિજમહાદુઃખનાશાય શૈવાઃ ॥ ૬૩॥

સ શૈવપૂજિતાપાર લિઙ્ગાનિ વનપાલકઃ ।
પ્રણમ્ય દારતનયૈઃ સંસ્તૌતિ પરમાર્થતઃ ॥ ૬૪॥

—

ભિલ્લઃ -
પાહિ બિલ્વવનમીશ્વર શમ્ભો હસ્તિહસ્તમૃદિતં નવશાખમ્ ।
દન્તિકૃત્તિવસ મામવ શમ્ભો બન્ધુરાલક દયસ્વ મય્યપિ ॥ ૬૫॥

હર હર મુરભિત્પ્રપૂજિતાઙ્ઘ્રે સ્મરહર કુરુ મય્યકિઞ્ચને દયામ્ ।
હર હર ગુરુતાપભારં ગરધર શઙ્કર ચન્દ્રશેખર ॥ ૬૬॥

—

ઈશ્વરઃ -
ઇત્થં શૈવજનાન્વિતં સ વિપિને ભિલ્લોઽપિ બિલ્વીવને
 ધ્યાત્વા મત્પદપઙ્કજં વિધિનુતં બિલ્વાદિસન્મૌલિભિઃ ।
ગઙ્ગાસાગરસઙ્ગમે વિપિનવન્મલ્લિઙ્ગસમ્પૂજકો
 બિલ્વાદ્યૈર્ગણનાયકઃ સ સુતરાં મુક્તો ભવત્યદ્રિજે ॥ ૬૭॥

યો બિલ્વચ્છદપૂતલગ્નવસનૈઃ સંશ્લિષ્ટગાત્રાન્ દ્વિજાન્
 તન્મૂલે સુખશીતલે પિતૃગણાન્ સમ્ભોજયેત્ ષડ્રસૈઃ ।

તસ્યાન્નં શતવર્ષતૃપ્તિજનકં ભૂયાત્ પિતૃણાં મુદે
તચ્છ્વર્વાર્પિતતર્પિતાન્નપિતરસ્તુષ્યતિ હૃષ્યન્તિ ચ ॥ ૬૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવગૌરીદસંવાદે સાગરેશ્વરલિઙ્ગશિવક્ષેત્રે ભિલ્લેન વનસંરક્ષણવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૩૧॥ -

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 31.. -

Notes:

Shiva outlines the merits of worshipping at Sagareshwara Linga situated at the Ganga-Sagar-Sangama Shiva Kshetra, amidst the Bilva forest that was protected by a local Bhilla from rampaging elephants.

The shloka numbers have been maintained per the source text.

Proofread by Ruma Dewan

---

*Sagareshvaralingashivakshetre Bhillena Vanasamrakshana Varnanam*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*